गुरुकुल-पत्रिका

ज्येष्ठमास: २०२५

मई-जून १९६८

पूर्णांक: २३८

प्रकाशक:

श्री धर्मपालो विद्यालंकार:

स० मुख्याधिष्ठाता

गुरुकुल कांगड़ी विश्वविद्यालयस्य

ओ३म्

गुरुकुल-पत्रिका

[गुरुकुल कांगड़ी विश्वविद्यालयस्य मासिक पत्रिका]

ज्येष्ठ २०२५, मई-जून १९६८, वर्षम् २१, अङ्कः १०, पूर्णाङ्कः २३८

श्रुति-सुधा

(ऋषि.–मेध्यातिथिः काण्वः । देवता–ऋभवः । छन्दः– गायत्री)

उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतम् ।
अकर्त चतुरः पुनः ।। ऋ० १ २०।६

(उत) और (त्वष्टुःदेवस्य) त्वष्टा देव के (निष्कृतम्) निष्पन्न व निर्मित (त्यं) उस (नवं चमसं) नवीन मस्तिष्क को तुमने (पुनः) फिर (चतुरः अकर्त) चार में विभक्त कर दिया ।

चमस तथा त्वष्टा के सम्बन्ध में हमने 'ऋभु देवता' नामक अपनी पुस्तक में विस्तार से विचार किया है । यहां हम संक्षेप में अन्य विचार प्रकट करते हैं । त्वष्टा भगवान् संसार में समग्र पदार्थों के तक्षण करने और उनको रूप देने वाले हैं । मानव शरीर के भी ये निर्माता हैं । उन्होंने स्त्रीगर्भ में नया चमस अर्थात् नया मस्तिष्क दिया । मस्तिष्क चमस (चमचा) है, अर्थात् मस्तिष्क में विद्यमान देव इसके द्वारा सोम का पान करते हैं । अतः इसे देवपान भी कहा है । इस देवपान चमस के ऋभु लोग चार विभाग करते हैं । 'ऋभु देवता' नामक पुस्तक में हमने चार वर्णों में विभक्त करने का भाव लिया है, यहां हम दूसरा भाव दिखाते हैं । द्युलोक के तीन विभाग माने हैं । (अवमा, पीलुमती, प्रद्यौ) इसी प्रकार द्युलोक स्थानी मस्तिष्क के भी ३ विभाग माने गये हैं । इन तीनों का ऊर्ध्व में उद्घाटन करना इन्हें ४ भागों में विभक्त करना है । द्युलोक से ऊपर का क्षेत्र इनके लिये खोलना है । इस प्रकार ये 'चतुर्वयम्' चार क्षेत्रों में व्याप्त होने वाले हो जाते हैं । चार भागों में इनकी व्याप्ति ऋत से देदीप्यमान ज्ञानरश्मियां करती हैं ।

★★★

एशियाभूभागे पत्राणां विकाशे विघ्नबाधाः

(ले० विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुर (राज०)

तद्दिने गुर्जरभाषायाः सन्देशनाम्नि दैनिकपत्रे उपरि शीर्षके लिखितो लेखोऽस्माभिः पठित । पठनानन्तरमस्मन्मनसि संस्कृतपत्राणां वर्तमान-स्थितिविषयेऽनेके प्रश्नाः समुपतिष्ठन्त । ततः संस्कृतभाषायाः पत्रकारिता-क्षेत्रे कार्यं कुर्वतां पत्रकाराणां, सम्पादकानां, व्यवस्थापकानां तथा लेखकानां च संस्कृतपत्राणां स्थितिविषये ध्यानाकर्षणाय सएष लेखोऽविकलमनूद्य प्रकाश्यते, आशास्यते च संस्कृतपत्रकाराः पाठका लेखकाश्च कमपि तात्त्विकं लाभं गृह्णीयुरिति—

लोकतन्त्रस्य निर्माणे पत्रपत्रिकाणां महत्त्वपूर्णे योगदाने सत्यपि एशियाभूभागस्य देशेषु तेषां (पत्राणां) प्रसारः कियन्न्यूनो वर्ततेऽस्य तथ्यस्य विचारः कैश्चित्सङ्ख्याङ्कैर्भवितुमर्हति । सन् १९५८ वर्षस्य गणनानुसारं तदानीं भारते चतुष्कोटिसंख्यका जनाः साक्षरा आसन् परन्तु स्वदेशीयभाषायाः पत्राणाम् प्रसारस्त्रिशतलक्षेभ्योऽपि न्यूनोऽभूद्यदा-- 'डेली मिरर' नाम्नो लन्दननगरस्यैकस्यैव पत्रस्य तद्वर्षस्य सञ्चारः पञ्चाशल्लक्षसंख्यकानां प्रतीनामासीत् । भारते हिन्दीभाषाभाषिणीनां प्रजानां पञ्चविंशतिकोटिमितानाम् वसतौ सत्यामपि हिन्दीभाषायाः पत्राणां प्रसारश्चतुर्लक्षमात्रमभूत् । जापानदेशमपवादरूपं विहाय-एशियाभूभागस्याधिकांशदेशानां पत्राणां स्थितिरित्थमास्ते—

साम्यवादिभ्यो देशेभ्योऽतिरिक्तं पाकिस्थानाज्जापानपर्यन्तमेकार्बुदप्रमाणायां वसतौ प्रायेण सार्द्धचतुष्कोटिमितानि दैनिकानि पत्राणि विक्रीयन्ते । एष्वेव जापानदेशस्य सार्द्धत्रिकोटिसंख्यकानां दैनिकानां समाचारपत्राणां समावेशो भवति । अस्यायमर्थो भवति यद्धि भारतस्य षट्चत्वारिंशत्कोटिप्रमाणायाया वसतेरतिरिक्तं पाकिस्थानस्य सार्द्धनवकोटिमितानां, इण्डोनेशियाया दशकोटिसंख्यकानां, वर्मादेशस्य च सार्द्धद्विकोटिभ्यामधिकानां तथा फिलिपाइन्सदेशस्य त्रिकोटिसंख्यकानां जनानां वसतौ पत्राणां प्रसार एककोटिमात्रमेवास्ते । यूनेस्कोसंस्थाया अनुमानानुसारं प्रत्येकमेकसहस्रजनानां वसतौ पत्राणां लघुतम प्रसारः शतसंख्यामितो भवितुमर्हति । सत्यप्येवं, भारते पत्राणां स एष प्रसारस्त्रयोदशसंख्यातोऽपि न्यूनोऽस्ति । अस्य तुलनायां आरब्यगणतन्त्रे विंशतिः, लङ्कायां षट्त्रिंशत्, जापानदेशे ४१६ तथा ब्रिटेनदेशे ४४८ पत्राणां प्रसारो विद्यते ।

संस्था चैषाऽऽन्तरराष्ट्रिया कदाऽभूत् ?

नवदेहल्यां राष्ट्रपतिमहोदयेन डा. श्री राधाकृष्णमहाभागेन यस्या उद्घाटनं विहितं, तस्या 'इण्टरनेशनल-प्रेस-इन्स्टीट्यूट' इति संस्थाया अस्तित्वं तु विगतेभ्यः पञ्चदशवर्षेभ्यो वर्तते परन्तु यथार्थतोऽस्याः संस्थाया 'आन्तरराष्ट्रियत्वं' त्वनुमानतः षड्वर्षेभ्य एव समघटत । प्रारम्भे तु संस्थाया अस्या वर्तुलं लघुतरमासीत्, यतः सैषा संस्था समानकक्षान् मुद्रणालयान् दधतां केषांचित् परिमितानामेव देशानां विषये विचारविमर्शं कुर्वाणाऽऽसीत् । वैधानिकशासनस्य, पत्राणां स्वातन्त्र्यस्य च विषये तेषां वर्तनमेकसदृशमभूत् । तदुद्देश्यं च देशानामेतेषां सम्पादकानां, प्रकाशकानाम्, तथा च पत्रकाराणां मध्ये परस्परं सम्पर्कसाधनमभूत् । एशियाभूभागस्य, लैटिन-अमरीकायाश्च केचन जनाः संस्थाया

अस्याः सदस्या आसन् परन्तु ते केवलं नामसंकीर्तनार्थमेव । अद्यत्वे तु संस्थायामस्यां पञ्चाशतोऽप्यधिकानां देशानां १५२२ प्रमाणाः सदस्याः सन्ति । एशियाभूभागस्य शतत्रयाधिकाः पत्रकारा अस्याः संस्थायाः सदस्या वर्तन्ते । सन् १९६१ वर्षात् पश्चादेव सेय संस्था, येषां देशानां प्रथमः प्रश्नो मुद्रणालयस्यैवाभूत्तेषामेव परिस्थितिं स्वहस्ते जग्राह ।

अस्याः संस्थायाः प्रथमः सञ्चालकः ई. जे. बी रोजमहाशयस्तथा तारजी विट्टाचिमहाशयश्चैत्याभ्यां द्वाभ्यां सैषा संस्था पश्चिमस्य पाशाद्वमोच्यत । संस्थायाः पटलेनापि तन्नीतिः स्वीकृता । तत आरभ्य सेयं संस्था पूर्णतः कार्यं कुर्वाणास्ते । ज्यूरिचनगरे वर्तमानेऽस्याः संस्थायाः प्रधाने केन्द्रिये कार्यालये पुस्तकालयस्तथा संशोधनकेन्द्र च विद्येते । एशियाद्वीपे तथाऽफ्रिकादेशे च सैषा संस्था पत्रकारिताक्षेत्रे कार्यं करोति ।

फोर्डसंस्थानस्य, रोकफेलर संस्थानस्य तथा एशियन-फाउण्डेशनसंस्थानस्य वित्तीयपाशात् परित्राय भारते, फिलिपाइनदेशे, मलयेशियादेशे, तथा च कोरियादेशे राष्ट्रिय-प्रेस्-इन्स्टीट्यूटस्य संस्थाः प्रारब्धाः । चीनदेशस्य मुख्यभूमेर्बहिश्च चीनभाषायाः पत्राणामप्येका संस्था प्रारेभे । थाईलैण्डदेशे तथा मलायादेशे च प्रादेशिकस्तरे शैक्षणिकाः कार्य-क्रमा हस्तेऽगृह्यन्त तथा पुनरेशियाभूभागे समस्ते विशेषज्ञानां हट्टास्तथा परिसम्वादाः समायोज्यन्त । अतोऽतिरिक्तं राष्ट्रस्य पत्रद्वारा संचालिताः संस्थाः प्रारब्धुम् तदेतत्सङ्घटनं (राष्ट्रिय-प्रेस-इन्स्टीटयूट) साहाय्यमकरोदस्योदाहरणमास्ते 'प्रेस-इन्स्टीट्यूट ऑफ इण्डिया' इति । प्रारम्भे सङ्घटनमिदं वित्तीयां शिल्पगतां च सहायतां चक्रे परन्त्वद्यत्वे तु 'प्रेस-इन्स्टीट्यूट आफ इण्डिया' स्वसत्तात्मिका संस्थैवास्ते खलु ।

एशियाक्षेत्रे समधिको रसः

सम्वादपत्राणां दशा एशियाभूभागे किलैकस्त्रुटितोऽस्ति खंडः । जापानदेशस्य शक्तिशाली सुविशालस्तथा सर्वथाद्यतनो मुद्रणालयो जापानादिर्बहिरपरिचितोऽभूत् । फिलिपाइनदेशस्य मुक्तानि सम्बादपत्राणि, भारतस्य प्रमाणतः शांतप्रकृतीनि सम्वादपत्राणि, लङ्कायाः नगरपर्याप्तानि मर्यादितानि पत्राणि तथा च थाईलैण्डस्य विविधविधानि पत्राणीत्येतेषाम् मध्ये न कापि शृंखलासीत् । तदेतत् इण्टरनेशनल-प्रेस-इस्टीट्यूट-संस्थानमेशियाभूभागस्य चेतनामुदपादयत् तथा एशियाखंडस्य विविधदेशानां पत्राणां मध्ये मिथः शृंखलामेकामुदपादयत् । वर्षद्वयपूर्वं टोकियोनगरे जातस्य परिसम्वादस्याधिवेशने इंटरनेशल-प्रेस-इंस्टीट्यूट संस्थानमेशियाभूभागस्य पत्रेष्वधिकरसमादातुमाग्रहं चकार । परिणामतोऽद्यत्वे 'एशियन-न्यूज-एजेंसी,' 'आग्नेयेशियादेशानां' कृते लेखाः, पत्रकाराणामादानप्रदानप्रभृतीनां प्रश्नानां विचारं कर्तुं वयमुद्यताः स्मः संजाताः । वर्षपञ्चकात् प्रागस्य विचारोऽपि च नैवासीत् ।

अफ्रिकायां त्वस्य संस्थानस्य कार्यं कठिनमास्ते । एशियाभूभागस्य तुलनायामाफ्रिकादेशस्य पत्राण्यल्पविकसितानिसन्ति पत्रकाराणां संख्यापि सर्वथाल्पीयसी वर्तते । तत्र शिक्षणस्याभावो विद्यते । अतः सर्वप्रथमं तु नैरोबीनगरे तथा लाग्रोसनगरे च पत्रकारेभ्यः प्रशिक्षणं प्रददाने द्वे शाले प्रारब्धे ।

मास्त्येवास्यायमभिप्रायो यद्धि इंटरनेशनल-प्रेस-इन्स्टीट्यूट-संस्थानस्य कार्यं पूर्णतां जगामेति तथाधुना विश्रामस्य सुखमयः समयः समायन्नाविति । द्वयोरप्यनयोः खंडयोर्नवीनं शिल्पतन्त्रं

तथा च व्यवस्थां कर्तुमधुनावशिष्यते तथा चैशिया अफ्रिकाभूखंडयोर्बहुषु देशेषु पत्रसम्बन्धिनः स्वातन्त्र्यस्य संघर्षं इदानीमारब्धश्चास्ति । सर्वकारः पत्रेष्वङ्कुशं स्थापयेत्ततः पूर्वं किमपि चिन्तयेदित्थं विधविश्वव्यापि-लोकमतसाधने संस्थानस्यास्य गणनपात्रं योगदानमास्ते ।

भारते पत्राणि

भारतवर्षदेशेऽस्माकं सन् १६५६तः सन् १६६४ पर्यन्तं पंचवर्षाभ्यन्तरे पत्राणां वार्षिकः प्रसारः षट् प्रतिशतप्रायो वृद्धिं गतोऽस्ति । सन् १६५४ वर्षेऽस्य संचारः पंचविंशतिलक्षप्रमाणोऽभूत् । स च १६६५ वर्षे त्रिषष्ठीलक्षपर्यन्तं प्राप । परन्तु देशस्यास्य पंचाशत्कोटिसंख्यात्मिकायां जनवसतौ, यत्र चैकादशकोटिभ्योऽप्यधिकसंख्यका लोकाः साक्षराः शिक्षिता वा भवेयुस्तत्र पत्रसंचारस्य स एषोऽकोऽतीवाल्पीयान् विद्यते । तत्रापि राज्यक्रमानुसारं परिस्थितिर्भिन्ना भिन्नास्ते । केरलप्रान्ते पंचचत्वारिंशद्दैनिकानि सम्वादपत्राणि वर्तन्ते तथा तेषां प्रसारः प्रतिसहस्त्रं वसतौ ८४.१ मितोऽस्ति । महाराष्ट्रप्रान्ते पत्राणां संचारस्य प्रमाणं प्रतिसहस्त्रं जनवसतौ ३६ विद्यते । अथ ऊडिसाप्रान्ते पत्राणां संचारप्रमाणं ८.५० मितमास्ते । बंगीयानि, महाराष्ट्रियाणि तथा मलयालमपत्राणि सत्वरं प्रगतिं चक्रुः परन्त्वन्यभाषाणां पत्राणि तादृशीं प्रगतिं नासाधयन् । भारते प्रतिशतम् ८६ प्रायाणि दैनिकानि पत्राणि विंशसहस्त्रेभ्योऽपि न्यूनं संचारमासादयन्ति । लघुसम्वादपत्राणां समक्ष तन्निर्वाहस्य, विकाशस्य तथा तत्स्वातन्त्र्यस्य च मुख्यः प्रश्नो विद्यते । भारते दूरदर्शनयन्त्राणां (टेलीविजन) अभावोऽस्ति तथा च मुक्ता खल्वाकाशवाणी चापि नास्ते, ततः समाचारपत्राणां प्रभुत्वं प्रभूतं विद्यते । सत्यप्येवं तानीमानि समाचारपत्राणि समधिकांशं नागरिकाणि मुद्रणानि वर्तन्ते । ग्रामेषु तु द्विप्रतिशतमपि सम्वादपत्राणां न प्राप्नोति । विंशतिवर्षेभ्यो भारते विविधक्षेत्रेषु जातैः परिवर्तनैस्ते (ग्रामाः) सुपरिचिताः न सन्ति । भारतीयानां समाचारपत्राणां शक्तिः प्रभूता वर्तते परन्तु तानि स्वशक्तेः परिपूर्णां ज्ञानचेतनां न दधत इति ।१

---

१ 'सन्देश'-नाम्नो गुर्जरभाषाया दैनिकपत्रस्य कार्तिकशुक्ला ५ गुरुवार संवत २०२३ दि० १७ नवम्बर १६६६ संस्करणात् साभारम् ।

(गतमासाङ्कतोऽग्रे)

साधना

श्रीसत्येन्द्रबाबुकृतसाधनायाः अनुवादको महाकविरामकृष्णभट्ट. 'हिन्दुकॉलिज' दिल्लीविश्वविद्यालयः

अष्टमः परिच्छेदः

उभावप्यधिकारिणौ कुतूहलाकलितमानसौ "पत्रशकलम् ! कीदृश पत्रम्" ? इत्यन्वयुञ्जाताम् ।

मणिमहाशयस्तु किञ्चित्पत्रखण्डमुभाभ्यां प्रदर्श्याब्रवीत्—"एतच्छकलं तृतीयभूमिकाप्रकोष्ठ उपलब्धम्, अस्य च्छेदनप्रकारमभिलक्ष्येत्थं वदितुं शक्यते–अस्यावशिष्टं खण्डं तेन नरेण वह्निनलिकाया अन्त. प्रक्षिप्तमिति ।"

"पश्यामस्तावत्तत्र किञ्चिल्लिखितं वा न वेति"

"नात्र बहु लिखितं किञ्चित् । केवल 'स्वामिनः श्वो हरिद्वारे, काश्यां द्रष्टव्यम्' इत्येतावदेव लिखितम्" ।

अधिकारी तत्पत्रं स्वहस्तेनादाय व्याजहार–– अत्र मधुरं मृगमदसौरभमुज्जिहीत" इति ।

"तत एतावदुन्नेतुं सुशकम्—पत्रे कस्तूरी निबद्धा । अग्निगोलप्रहर्त्ता कोऽपि कमपि स्वामिनमधिकृत्य लिखितवान् । नलिकाप्रयोगवेलायामावश्यकं पत्रं त्वरया प्रवृत्तिपत्रादेव विच्छिद्य प्रयुक्तवान् इति । पत्रे मृगमदनिक्षेपणं गवेषणकार्यस्य साचिव्यमातनोतीति च प्रतीमः ।"

प्राड्विव—तद्यथाकथमपि वा भवतु । गवेषणकार्यमिदानीं भवदायत्तं वरीवर्त्ति । अद्य भवन्त इमां नयन्तु कन्यां स्वगेहम् । इयमञ्जसा परिपाल्यते भवद्भिरिति मे दृढो विश्वासः ।

मणिमहाशय उत्थाय 'प्रयतिष्ये यथाशक्ति' इत्यवादीत् । कन्यायाश्च हस्तं यावद् गृह्णाति तावत्सापि झटित्युत्थाय यथापूर्वं तद्देहसम्पर्कमुपलभ्य शिलामूर्तिरिवावतस्थे । मणिमहाशयश्चोभावप्यधिकारिणौ प्रणम्य स्वरथे कन्यया साकमुपाविक्षत् ।

तस्य स्वान्त चिरात्परदुःखदुःखितमासीत् । इमामन्धेडमूकायाः कन्यायाः कृपणामवलोक्य दशां तन्नूनं द्रवतां यातम् । विललाप च सः "हा हन्त ! ईदृशरूपमाधुर्यस्यापीयं दशा दारुणा ! कीदृशो महापातकस्येदमुपनतं फलम्" ? इति ।

तस्यां न केवलमस्य कारुण्यमनल्पम्, अपि तु यदैवायं व्यसनातिभारपरिम्लानं तन्मुखमवालोकयत, तदैव मधुरं निरुपमं तन्मुखं तस्य हृदयपटे समालिखितमभूत् । तन्मनोहृदयप्राणा अपि सर्वात्मना तस्यामैकात्म्यमभजन् । प्रायेण जनः कथयति 'प्रथमदर्शन एव प्रेमोद्गम' इति । किमिदं तादृशम् ? किं मणीन्द्रस्तस्यामनाथायामनुरक्तः ?

इमं व्यतिकरं मणिमहाशयो नाज्ञासीदिति न शक्यं वक्तुम् । तेन हि बह्व्यो ललनाः कन्याः सुन्दर्यश्च प्रकाममवलोकिताः । सोऽपि गर्भेश्वरः । अतस्तस्मै बह्वः स्वकन्यका दातुमुत्सुका आसन् । तथाप्यद्यावधि तस्य विवाहे मनागपि नासीदास्था । रतिसदृश्यामपि दर्शनपथमागतायां न तन्मनो मनसिजशरशरव्यतामयासीत् । 'कृतपाणिपीडनः संसारसागरे निमग्नो न कदापि विपत्स्ये । लोकसंग्रहे विशिष्य विपन्निगीर्णानां सान्त्वनायां दुर्वृत्तानां निग्रहे च निरतो जीवितं कुर्यां सार्थक' मिति स कृतदृढसङ्कल्पोऽभूत् । अस्यास्त्वनाथाया दुःखभागिन्याः कन्यकाया मुखारविन्दावलोकनेन स्वमानससमुत्थामभूतपूर्वां भावोद्रेकतरङ्गमालिकामालक्ष्य स तदनुरागिणमात्मानमबुद्ध ।

निर्निमेषनयनश्च तन्मुखं दृष्टिशून्यमवलोकयन्स हृदयोद्भूतावतरङ्गानपाकर्तुं नितरां प्रायतिष्ट । अभूच्चास्य चेतसि, "यद्यपीयं जन्मनैवान्धा स्यात्, तथापि न स्यादेडमूका जनुषा । आ जन्मनो ये चैडमूकास्ते प्रायेण भवन्ति मूढा जडाश्च । इयन्तु मुखदर्शनेनैव धिषणाविशेष विशिष्टेति प्रतिभायात् । केनापि कारणेनाद्यानाथा विपन्ना चैकाकिनी च सञ्जाता । न तु जन्मनैवान्धा चैडमूका । अतः प्रथमं या समर्थवाक्छ्रवणेन्द्रियाऽऽसीत् सा पश्चादामयेन खलानां भेषजप्रयोगेण वेमामवस्थां प्रापिता स्या"दिति ।

अक्षिणी परीक्षिते निवेदयतां नेयं जनुषान्धेति । तथा सत्यक्षिपटलं मीलितं भवेत् ।

मणिमहाशयेन तावन्नानाविषयका बहवो ग्रन्था अधीता. । तस्य मेधाशक्तिर्दर्शनञ्च समकक्ष्ये । प्रवहणे चलति तामधिकृत्य कन्यां कृतनूहापोहांश्चिन्तयन्स तन्मुखचन्द्रं विस्मृतनिमेषेण चक्षुषाऽऽपिबन् स्वविचाराणामवितथत्वमभिनन्दन् मनस्येवमकरोत्—"यद्येषा न जन्मना बधिरा चान्धा च स्यात्तर्हि रोगमुक्तेरस्त्येवाशा । यदि च धनव्ययेनारोग्यमस्याः शक्यं साधयितुं तर्हि साहाय्यकमस्या युक्तमाचरितुं शक्नुयाम् । प्रथमं तावदियं केत्यवगन्तव्यम्" इति ।

अकस्मादेव सा बाला मणीन्द्रस्य हस्तं जग्राह । तेन चकितः स तन्मुखमेव न्यध्यायत् । सापि दृष्टिशून्ये निजनयने उन्नमय्य तन्मुखे मुहूर्तं न्यास्थत् । पश्चाच्च शनैःशनैस्तस्य हस्ते किमपि किमपि चिह्नमालेखितुमुपाक्रमत ।

पूर्वं मणीन्द्रोऽस्य तात्पर्यं नाशकत्परिज्ञातुम् । यतः सोऽचिन्तयत्कन्याऽन्यमनस्कैवमाचेष्टत इति । किन्तु सा पुन पुनस्तेनैव क्रमेण चिह्नं करोति स्म । तद् विलोक्य स किमस्य सङ्केतस्य रहस्यमिति निपुणं निरवर्णयत् ।

हठादेवोपविष्टः स उदतिष्ठत् । बाला च तस्य हस्तमाकृष्य तमुपवेश्य हस्ते पुनस्तदेव लिलेख ।

मणीन्द्रस्य च निपुणं निरीक्षमाणस्य तद् देवनागरीलिपिलिखितं प्रतिभाति स्म । अक्षरसंयोजनेन च स तदवाचयत् । किं तया लिखितमासीत् ? 'कुत्र अहम्' इति ।

नवमः परिच्छेदः

तदानीं यामानन्दस्य परां काष्ठामध्यतिष्ठन्मणिमहाशयः सा न कदापि तेन पूर्वमन्वभावि ।

इत्थमबला सा न केवलं लेखनसमर्था, अपि तु संस्कृतविदुषी चाभूत् । भाषान्तरं च सा न जानाति स्म । यद्यज्ञास्यत् तर्हि व्यवहारभाषायामेवालेखिष्यत् ।

इत्थं यद्यत्तेन प्रसन्नतर्केण सम्भावितं तत्सर्वमप्यवितथमेव परिणतम् । तथाहि, नेयमन्धा बधिरा मूका च जन्मना । अतः सर्वाऽपि प्रवृत्तिस्ततो वेदितुं शक्यम् । अस्या रहस्यभेदनं यथा तेन पूर्वं दुष्करमाकलितं नैतत्तथा साम्प्रतं प्रतिभाति स्म । अतस्तस्य हृदयमानन्दसन्दोहेन तुन्दिलमेव सञ्जातम् ।

मणीन्द्रो बालायाः सादरं करं गृहीत्वा स्वस्योत्सङ्गे निधाय देवनागरीलिप्यां गीर्वाणवाण्यामेव शनैश्शनैरलिखत्—"त्वम् इदानीं हितैषिणां सकाशम् आगताऽसि । इतः परं न ते किञ्चिद् अस्ति भयकारणम् । अग्रे सर्वम् अपि विदितं ते भविष्यति" इति ।

तस्याः सम्यगवबोधनाय मणीन्द्र एकैकमप्यक्षरं द्विस्त्रिश्चालिखत् । तेन चावेदीत्सा लिखितं सर्वमप्यजानादिति । तथापि सा न किञ्चिदलिखत्प्रत्युत्तरम् । मुहूर्तं च जोषमासाञ्चक्रे । ततो मणिमहाशयः पुनरप्यस्या हस्तं गृहीत्वा

'न ते किञ्चिद् भयमत्र' इति विलिख्य सान्त्वनाय तद्धस्तं सादरममृद्नात् ।

सा तु स्वपाणिं शनैर्विमोच्य तस्य हस्ते पुनरलिखत्—"कुत्र अहम्" इति ।

मणीन्द्रोऽलिखत्—"आग्रानगरे । सम्प्रति त्वाम् अहं स्वगृहं नयामि । क्व ते स्वजनः ?" इति ।

"अहं न जाने ।"

"अपि ते पितरौ स्तः ?"

"न ।"

"केन त्वं पालिता पोषिता चासि ?"

"स्वामिना"

"स कुत्रास्ति ?"

"नैतज्जाने ।"

"कुत्र गन्तुं त्वमिच्छसि ?"

"न जाने ।"

"केन त्वम् अत्रानीता ?"

"न जानामि ।"

"कस्मिन्वयसि तवेयं दशाऽऽपतिता ?"

"द्वादशे वत्सरे ।"

"किन्निमित्तम् इदम् इत्थम् अभूत् ?"

"न जाने ।"

"कुत्र आसीः ?"

"पर्वते ।"

"कुत्र स पर्वतः ?"

"न वेद्मि ।"

"कदा त्वं तत आयाता ?"

"एतद्दशापरिवर्तानन्तरम् ।"

"कस्त्वामत्रानीतवान् ?"

"न जाने ।"

मणिमहाशयस्य मानसमद्य प्रसन्नं सन्नतं च सम्पन्नम् । बाला लेखितुं प्रभवतीति विज्ञाय तस्य हृदयमानन्देनोत्साहोत्सवेन च परिप्लुतमभूत् । सम्प्रति परीक्ष्यमाणे वृत्तमन्यथैवासीत् न तु यथा तेनालोचितम् । सा हि न जानीते स्म किञ्चिदप्य त्मविषयम् ।

द्वादशहायनं यावत्सा कस्यचित्सन्यासिनः सविधे न्यवसत् । तदनु केनापि कारणेन हठात्तस्या वागदृक्छ्रुतीन्द्रियाणि नष्टानि । तत परं केचित्तां तस्मात्पर्वतादन्यत्रानैषु. । तदा प्रभृति सा स्वस्यावस्थानं चेष्टितं च न मनागपि चेतयते । अतो मणीन्द्रः" अस्तु तावत् । नैराश्यं किमर्थमवलम्बनीयम् । गच्छता कालेनास्याः सकाशादितोऽप्यधिको वृत्तान्तः शक्यं ज्ञातुम्" इति समाधाय तस्या हस्तमादाय पुनर्लिलेख—

प्रकोष्ठमानीय तत्र कस्मिंश्चित्पर्यङ्के तामुपवेश्य स्वयमपि तत्पार्श्वे निषण्णस्तद्धस्तमादाय व्यलिखत्—"इदं मदीयमेव भवनम् । नात्र तव किञ्चिद्भयम् । यथात्र न ते काचित्पीडा स्यात् तथाहं सर्वं संविधास्ये । अद्यैव तव सेवार्थं काञ्चिद् दासीं नियोक्ष्ये । यदि ते किञ्चिदावश्यकं स्यात्तदाऽह बोधनीयः । इदं गृहमात्मीयं विद्धि । त्वमत्र यथेच्छं निवसे" ति । एतावन्ति संस्कृतवाक्यानि तद्बोधनाय विलेखितुं मणीन्द्रस्य महान्प्रयास एव जातः । सापि तदर्थं सम्यगबुद्धेति सोऽभ्यज्ञासीत् । तथापि सा न किमप्युत्तरं प्रत्यपादि । तदा मणीन्द्रः पुनरलिखत्—"यदि त्वमन्यत्र कुत्रापि गन्तुमिच्छसि कथ्यताम् । यत्र त्वमिच्छसि गन्तुं तत्र त्वामञ्जसा नेष्यामी" ति । यथापूर्वं सा निश्चलहृदया न्यषीदत् । तस्य

कारणमजानानो मणीन्द्रो हृदयवेदनामनुभवन्पुनर्लिलेख—"अपि नामात्र ममावस्थानेन तव कश्चित्क्लेशः स्याद्" इति ।

तदा साधना व्यथितेव "न हि न हि" इत्यलिखत् ।

"एवञ्चेद् अत्रैव स्थास्यसि किम् ?"

"अथ किम् । अत्रैव स्थास्यामि । मा मामन्यस्य कस्यापि सकाशं प्रहैषीः ।"

"अपि त्वं बङ्गाभिजना ?"

"न ज्ञायते ।"

"कतमा ते जातिः ?"

"न वेद्मि ।"

अनेन व्यतिकरेण मणिमहाशयो न केवलं वितथमनोरथः, अपि तु हतप्रत्याशश्चाजनि । तस्य हृदयं च कम्पितुमुपाक्रमत । स पुनरपि तस्याः पाणितले "अपि त्वमुदूढा ?" इत्यनुयोगमलिखत् ।

सा तु न किञ्चिदुत्तरं लिलेख । मणीन्द्रश्चाऽऽकम्पितहृदयः पुनरन्वयुङ्क्त । तदा सा स्वपाणिमाचकर्ष । स च पाणिः कम्पमानो मणीन्द्रस्य निपुणनिरूपणचणस्य दर्शनस्य विषयत्वमगात् । पश्चात्सा शनैश्शनैः "ने" त्यलिखत् ।

"किं ते नाम ?"

"साधना" ।

अनेन च समयेन रथस्तद्गृहप्राङ्गणमागत्यातिष्ठत् । मणीन्द्रोऽपि कन्यां सादरं रथादवतार्य गृहाभ्यन्तरमनैषीत् । तदा तस्य किङ्करा आश्चर्यचकिताः प्रेक्षितुमारभन्त । तथापि नैकोऽपि त प्रष्टुमैष्ट । मणीन्द्रश्च साधनां सुष्ठ्वलङ्कृतमात्मीयं तन्निशाम्य मणिमहाशयोऽप्यमन्दानन्दनिष्यन्दहृदयः पुनस्तामपृच्छत्—"आ दास्या आगमनाद् अहं तव पार्श्वे स्थास्यामि । अपि नाम तेन ते कश्चिदन्तरायः स्याद्" इति ।

"न हि" ।

नवमः परिच्छेदः समाप्तः

—०—

अहो ! चित्रकारस्य कौशलम्

कवि श्री विश्वनाथ केशव छत्रे द्वारा श्री भावे ५२ मंचरी रेग्रोन 'डी' क्वार्टर्स,
धोबीघाट पो० शहाड, जि० ठाणे

(दिनदर्शिकाया चित्रितायाः धीवरकन्यकायाः कण्ठात् अधः लम्बमानः कृष्णवर्णमणिहारः अचित्रार्पितः सत्यः इव अनिशं दृष्टि आकर्षन् एनं श्लोकं रचयितुं कविं प्रेरयामास)

मन्ये धन्यः खलु कविवरं चित्रकारोऽतिशेते,
कर्षन् नित्यं १जनदृशमहर्दर्शिकाकौशलेन ।
ग्रंथावद्धा सुकविकविता स्त्रीव साध्वी सुरम्या,
२यद्रम्यत्वं न सकलजनाः प्रेक्षितुं शक्नुवंति ।।

१ दिनदर्शिका । २ रूपस्य तथा सद्गुणानामपि ।

स्कन्द स्वामी ?

श्री डा० मञ्जुलमयङ्कपन्तुल:, वेदव्याकरणाध्यापक., विश्वभारती, शान्तिनिकेतनम्

तत्कोऽसौ स्कन्दस्वामी कुत्रत्योऽसौ किमुद्दिश्य भाष्ये प्रवृत्तः, अनुवर्त्तते काञ्चन भाष्यपरम्परां, संप्रदायं वा कमपि, स्वयमेव वा प्रवर्त्तयिता भाष्यपद्धतेः इति समग्रमपि शोधपरं विवेक्तव्यञ्चास्ति।

तत्र तावत् सत्स्वपि बहुषु बाह्याभ्यन्तरप्रमाणेषु, भाष्यकारस्य स्वकीयोक्तिरेव तत्परिचयाय सर्वप्रमाणमिति असंदिग्धम् । भाष्यकारेण चात्मनः ऋग्वेदभाष्यस्यान्ते प्रत्यध्यायम् एकेन श्लोकेन आत्मपरिचयः१ प्रदत्तः ।

तेन च जानीमः यदस्य नाम स्कन्दस्वामी पितुर्नाम भर्तृध्रुवः विनिवासस्थानं च वलभीति ।

किञ्च नैतावतैवालम् । यतो हि कोऽसौ भर्तृध्रुवः का चेयं वलभी, वलभीभर्तृध्रुवयोरुभयोरपि मिथः कः सम्बन्धः, विनिवासीति पदस्य किं रहस्यम्, श्लोकोपलभ्यमानेन "संहृति" पदेन च किमभिमतम्, प्रभृति बहवः प्रश्नाः समाधानमपेक्षन्ते ।

विनिवासः

सामान्यतः वलभीति पदेन सौराष्ट्रगतायाः इतिहासप्रसिद्धाया एव वलभ्याः ग्रहण भवति या च अद्यत्वेऽपि "बड़"२ इति नाम्ना सर्वेषां सुविदिता । इयञ्च वलभी ४६३–७७६ तमेषु पश्चादीस्वीयेषु वत्सरेषु मैत्रकराजभिः अशासिष्ट३ ।

अथ चेत् स्कन्दपद्योल्लिखिता वलभी इयमेव वलभी अभिमता भवेत्, तर्हि वलभ्याः अभिसम्बन्धात्, कोऽसौ भर्तृध्रुव इति सारल्येन निर्णेतुं शक्यते । ततश्च स्कन्दस्वामिनः भर्तृध्रुवसुतत्वमपि उपपरीक्षितुं शक्यते । किन्तु विद्वत्सु सन्ति बहुविधाः विप्रतिपत्तयः एतस्मिन् विषये । एके४ "उत्तरकेरलदेशैकदेशकुक्कुटक्रोडाधिकारान्तर्गतचिरक्कलतालूकघटककण्णूरसमीपस्थितां वडपट्टणसंज्ञिता"मपि वलभीं वलभीत्वेन संभावयन्ति । अन्ये५ चोद्गीथस्कन्दस्वामिनोरेकत्र वासस्थानं परिकल्प्य उद्गीथभाष्योपलब्धम्, "वनवासीविनिर्गताचार्यस्य उद्गीथस्य कृतौ"६

---

१ वलभीविनिवास्येतामृगर्थागमसंहृतिम् ।
भर्तृध्रुवसुतश्चक्रे स्कन्दस्वामी यथामति ।।

2 K. M. Munshi — 'The Glory that was Gurjar-Desha, P. 29.
V. A. Smith — Early History of India, II Edition, P. 305.

3 Krishna Kumari Virjee — Ancient history of Saurashtra.

४ साम्बशिवशास्त्री—ऋक्संहितायाः उपोद्घाते पृ० ४ ।

5 Vanvasi mentioned here is the well—known Banvasi or Banvase which is now a Village in the North Kannara District, but was formerly the Capital of Kadamba Kings. It is a place of considerable antiquity and is mentioned by the Geographer Ptolmy (2nd Century A. D.) under the name Banausi It had the name Vaijayanti also (See the note 2 on Page 278 of Dr. Fleet's Dynastics of the Kananese Districts), A.V. Subbiah, J. O.R. Madras, 1936, P. 223.

६ वनवासी विनिर्गताचार्यस्योद्गीथस्य कृतौ,
ऋग्वेदभाष्ये · · · अध्यायः समाप्तः ।
उद्गीथऋग्वेदभाष्यस्य प्रत्यध्यायान्तम् ।

इत्यादि वाक्यसंदर्भमवलोक्य, भाष्यकारप्रयुक्तं "वलभीविनिवासी"तिपदं, वलभीवनवासीत्येतावता संशुद्ध्य, वलभीपनमेव७ स्कन्दस्वामिनो वासस्थानमवधारयन्ति ।

किन्तु यास्कप्रणीतनिरुक्तस्थस्य "अभ्रातेव८ पुसः" प्रभृतिमन्त्रस्य स्कन्दस्वामीयं व्याख्यानं दृष्ट्वा सारल्येनानुमातुं शक्यते यत्स्कन्दस्वामी नासीत् दाक्षिणात्यः । यास्काचार्यस्य "या अपुत्रा अर्गतिका सारोहति९" इति वाक्यं विवृण्वता स्कन्दस्वामिना, यस्य "दक्षिणापथे किलैष क्वचिद्देशधर्मः" इति वाक्यस्य व्यवहारः कृतः, तेन (क्वचिदिति संशयालुपदं वीक्ष्य) भाष्यकारस्य दक्षिणापथापरिचयः प्रत्यक्षतो विनिगम्यते ।

अथापि भाष्यान्तरवलोकनेन, सूक्ष्मेक्षिकया चैकांश्चिदपभ्रंशशब्दानपि प्रमाणत्वेनोदाहरणत्वेन चोपन्यस्तान् पश्यामः स्कन्दस्वामिना । ऋग्वेदं संस्कृतभाषया परिवर्द्धयन्नपि, प्रसंगतः, यान् एव द्वित्रान् अपभ्रंशभाषाशब्दान् उल्लिलेख भाष्यकारः त इमे नगण्याः सन्तोऽपि असंशयमेव महत्त्वकल्पाः । भाष्यकृतोल्लिखितेषु अपभ्रंशशब्देषु प्राधान्येन (अ) घरोविकला (इ) चवड अथवा चवट्ट (उ) अपल्लक अथवा अवकल्पक इतीमे शब्दाः दृश्यन्ते । घरोविकलेति१० शब्दं ऋ. वे. १.२९-६ याः ऋचः "कुण्डृणाच्या" शब्दस्य व्याख्यानावसरे, अपल्लक११ इति शब्दञ्च ऋ. वे. १-४६-८ याः ऋचः "अरित्र" शब्दस्य व्याख्यानावसरे, चवड१२ इति शब्दञ्च ऋ. वे. १-११२-८ याः ऋचः वर्तिकाशब्दस्य व्याख्यानावसरे, अवकल्पक१३ इति शब्दञ्च ऋ. वे. १-११६-५ याः ऋच, भूयोऽपि अरित्रशब्दस्य व्याख्यानावसरे कृतोल्लेख पश्यामः ।

अपभ्रंशभाषा च भारते तदा न केवलं व्यवहारसाधनमेव बभूव अपितु सुचिरं साहित्यरचनापरम्परामप्युवाह । अद्यत्वे अपि तद्भाषानिबद्धानि साहित्यिककृतीनि, तदतीतगरिमाणमेव सूचयन्ति । अन्वीक्षणाच्चैतस्या इतिहासानुमोदितः कालः ३०० तमपश्चादीस्वीयाब्दादारभ्य

---

7 C. K. Raja—Skanda Udgitha and Maheshwar Proceedings of A. I O C., 1930, Vol. I, Lahore

A.V. Subbiah—Skanda Swamin, Maheshwar and Madhava J O.R. Madras, 1936, P.223.

८ स्कन्दस्वामिनिरुक्तभाष्यटीका, अ० ३, ख. ५, मं. सं. १-१२४-७ पृ. १३१ ।

९ दक्षिणापथे किलैष क्वचिद्देशधर्मः ।
कितवानां दक्षिणत आस्फारे तिष्ठति ।
यो वा तां प्रथममाहन्ति स वैना गृह्णाति ।
सा च धनं लभत इति ।
Skanda Swamin and Maheshwar on the Nirukt chap. II—VI P. 131, Edited by L. Sarup.

१० कुड्ये अञ्चतीति कुण्डृणाची कुड्यचरी, गरगोलिकोच्यते, घरोविकलेति या अपभ्रंशेन लोके प्रसिद्धा । स्कन्दस्वामिनः ऋग्वेदभाष्यम् १-२९-६ ।

११ गच्छति येन नौः तदरित्रम् । अपल्लक इति अपभ्रंशेन यन्त्राविकानां प्रसिद्ध तत् ।
स्क ऋ. वे. भाष्यम् १-४६-८ ।

१२ वर्त्तिका नाम चटकजातिः, शीघ्रगतिः श्रमवर्जिता च । चवड इत्येव या लोके प्रसिद्धा ।
स्क. ऋ. वे. भाष्यम् १-११२-८ ।

१३ अर्यते अनेनेति अरित्रम् नावो गमनसाधनम् । यदवकल्पक इत्यपभ्रंशेन नाविका इत्याहुः ।
स्क. ऋ. वे. भा. १-११६-५ ।

१२०० तमपश्चादीस्वीयाब्दकालमिति यावत् लभ्यते ।१४

वलभ्याः राजा गुहषेणो यस्य कालः ५५६–६६ पश्चादीस्वीयो वत्सरः स्वीक्रियते, अपभ्रंश-भाषया काव्यानि विरचयामास ।१५ षष्ठशतके अ भ्रंशस्य चरमोत्कर्षो जातः, इति विज्ञाप्यते वलभीवल्लभस्य धरषेणद्वितीयस्य ताम्रपत्रलेखैः,यदा अपभ्रंशेन साहित्यनिबन्धनम् न केवलम् अनुरञ्जनाय अपितु उत्कर्षाय गरिम्णे चापि बभूव । अपभ्रंशभाषा चेयं सुराष्ट्राणामपि व्यवहारसाधनतामवाप, इत्यपि विद्वद्भिः बहुशः प्रतिपादितम् ।१६

अतएव प्रथमतः स्कन्दस्वामिनः भाष्यान्ते प्रत्यध्यायं लभ्यमाने पद्ये, वलभीति पदस्योल्लेखः, द्वितीयतः, भर्तृध्रुवस्योल्लेखः, तृतीयतः, अपभ्रंशशब्दानामुल्लेखः इति त्रिभिरपि स्कन्दस्वामिन, सौराष्ट्रदेशैकदेशगतायां वलभ्यामेव निवास आसीदिति समर्थ्यते ।

भाष्यकारेण च आत्मपरिचयप्रतिज्ञापद्ये यस्माद्वलभीविनिवासित्वमुद्घोषितम्, तस्माद्, एनेन, वलभी प्रयुक्तापभ्रंशभाषाया एव स्वभाष्ये उद्धरणानि दत्तानि इत्यपि अनायासमेवोपपद्यते । अपभ्रंशभाषा परा च वलभी सैव भवितुमर्हति, या सौराष्ट्रदेशैकदेशगता संप्रति "बड़" इति नाम्ना प्रसिद्धा । षष्ठे शतके च इयमेव वलभी, वाणिज्याधिकं व्यवतिष्ठतां नानादिग्देशागतानां वणिजां नाविकानाञ्च केन्द्रमभूत् ।१७ ऋग्वेदस्य १.१६५ याः ऋचः "अरित्र" शब्दस्य व्याख्यानावसरे नाविका आहुः पुनरपि ऋग्वेदस्य १.४६.८ याः ऋचः "अरित्र" शब्दस्यैव व्याख्यानावसरे, "यन्नाविकानां प्रसिद्ध तत्" प्रभृतिवाक्येषु अपि नाविकशब्दस्य प्रसक्तदभिधानात् विज्ञायते यद्भाष्यकारनिवासः क्वचित् नाविककुलसंकुले समुद्रतटवर्त्तिनि देशे अवश्यमासीत् । तच्चेदमनुभानम्, ऋग्वेदस्य १.११२.८ याः ऋचः वर्त्तिका शब्दस्य व्याख्यानावसरे भाष्यकारप्रयुक्तेन "अस्याः गच्छन्त्याः समुद्रमध्येऽपि शब्दः श्रूयते इति नाविका आचक्षते" इति वाक्येन बलिता पोष्यते । पुरातन्याः वलभ्या, अद्यत्वे बड़ इति नाम्ना प्रसिद्धायाः नगर्याः मानचित्रसम्मतमनुमोदितञ्च रूपं समुद्रतटवर्त्ति१८ एव ।

अत एव इतरैः संभाविता वलभी नाधिरोहति प्रमाणपरीक्षणपदवीम् । तस्मात् सौराष्ट्रदेशैकदेशगतैव वलभी, वलभीपदेन संभाव्यते नान्येति सर्वथोपपद्यते ।

विनिवासीति किम् ?

अतएव लेखकदूतकपदम् अवलम्बमानः स्कन्दस्वामिनः पिता, स्वकीयं प्राक्तनं निवासं परित्यज्य, ध्रुवषेणे बालादित्ये शासति, वलभ्यामेव विशेषेण निवासं चकार इति सारल्येन अनुमातुं शक्यते।

---

14 G. V. Jagane—Historical Grammar of Apabhransha.

15 Keith—History of Sanskrit Literature Apabhransha

16 G. V. Jagane—Historical Grammar of Apabhransha.
A. C. Woolner—Introduction to Prakrit
K. M. Munshi—Gujrat and its Literature, chap. V.
Keith—History of Sanskrit Literature

१७ दण्डिनः दशकुमारचरितम्–अस्ति सौराष्ट्रेषु वलभी नाम नगरी । – – – नाविकपतेः दुहिता रत्नवती नाम ।
K. K. Virjee — Ancient History of Saurastra, Economic conditions, chap. IV,

१८ परिशिष्टखण्डे वलभ्याः मानचित्र द्रष्टव्यम् ।

भाष्यकारेणापि स्वपित्रा साकमेव वलभी उषिता, पश्चाच्च पितुः सदृशमेव लेखककूतक पदमवलम्ब।

निरुक्तभाष्यप्रणयने, महेश्वरस्कन्दस्वामिनोः सहकर्तृत्वात्, महेश्वरस्य च निवासस्य जम्बूसरग्रामे सत्वात्, स्कन्दस्य तत्पितुर्वापि पूर्वनिवासो जम्बूसरो बभूव इति अनुमातुं शक्यते। एतच्चास्याभिः "महेश्वरस्य कालः" इति प्रकरणे सम्यगालोचितम्। एतद्दृश्यैव, संभवतः, भाष्यकारेण "वलभ्यां विशेषेण निवासोऽस्य असौ वलभीविनिवासी" इत्येतस्मिन्नर्थे वलभीविनिवासीति, पदं प्रयुज्यते। अस्य विग्रहस्य, उपपत्तेश्च सार्थकत्वात्, "वलभीवनवासी"ति संशोधितस्य वाक्यस्य, उद्गीथस्य च "वनवासो विनिर्गताचार्यस्य" प्रभृति वाक्यसंदर्भस्य कल्पनागौरवप्रसक्तत्वात्, भाष्यान्तःप्रमाणैश्च विरुद्धत्वात्, उपपन्नत्वं न सिद्धयति। तत् वलभीविनिवासीति पदस्य वलभ्यां विशेषेण निवासः अस्येति विग्रहे स्वीकृते, स्कन्दस्वामिनो विनिवासो वलभीति उपपद्यते।

———:०:·———

तिष्ठत पश्यत त्यक्त्वा चलत

श्री डा० कृष्णलाल, प्रवक्ता प० गि० द० ए० वै० महाविद्यालय, नई दिल्ली

अस्मिन् वसन्तसमये
प्रकृतिनट्या मन्ये
विश्वस्य मानसपटले
लिखिता निजसन्देशा
विविधैः कुसुमवर्णैः।
रक्तकुसुमैस्तिष्ठत भद्राः।
इतरवर्णैः पश्यत भद्रा.
हरितेन त्यक्त्वा चलत भद्राः।
तिष्ठत, पश्यत, त्यक्त्वा चलत।
सायं भ्रमता मया कदाचित्
उक्ताः सन्देशा मित्राय।
तेनावादि मया अवगतम्–
उद्याने तिष्ठत,
पश्यत दिव्यां कुसुमसमृद्धिम्,
यदा च भोजनवेला जाता
त्यक्त्वा क्षिप्रं चलत गृहं प्रति।"
मयापि मौनं तदा साधितम्।
अन्यस्मिन्न दिवसे भूयः
सायं भ्रमता मया कदाचित्
उक्ताः सन्देशा अपरस्मै।
तेनावादि" मया अवगतम्–
तिष्ठत गेहे,
पश्यत कष्टं सायं प्रातः
त्यक्त्वा सर्वं चलत वन प्रति।"
स हि सन्यासी तूर्णं जातः।
ममापि मानसमभूद् दुःखितम्।
पुनश्च भ्रमता मया कदाचित्
उक्ताः सन्देशा मित्राय।
तेनावादि" मया अवगतम्–
तिष्ठत अस्मिन् विश्वे बन्धो,
पश्यत तत्त्वं हृदयनिगूढम्,
त्यक्त्वा मोहं चलत चलत भोः,
चरैवेति शृणु चरैवेति भोः
अहं प्रफुल्लः सार्धं तेन
चलामि मत्तो
गायामि गीतं
विश्रान्तः सन्
अस्मिन् वसन्तसमये मधुरे॥

मम संस्कृतोत्कर्षवृत्तांतः

कविः श्री विश्वनाथ केशव छत्रे, द्वारा श्री भावे ५२ सेंचरी रेय्रोन 'डी क्वार्टर्स',
धोबी घाट, शहाड जि० ठाणे

(उत्तरार्द्धः)

(३२) मधुराः अनुभवाः

अत्र मधुरान् अनुभवान् कथयामि, यैः विपरीतानुभवस्मृतिः बहुंशेन विलोपिता।
'सुभाषचरिते' कालिदासशैलीप्रभावप्रत्ययः।

(१) रहस्यासह विभूतीचीं आठ स्तोत्रे (२) सुभाषचरितम् (३) आठ संत इत्येतानि पुस्तकानि वर्षाभ्यंतरे स्वद्रव्येण प्रकाश्य, तेषां विक्रयार्थं सोत्साहं पुण्यपुरी, वाई, सातारा, मोहमय्याः उपनगराणि इत्यत्र विद्यालयाद् विद्यालयं भ्रमणं कृतवान् अहम् १९६३ आक्टोबरमासान्तात् १९६४ फ़ेब्रु० मासपर्यन्तम्। प्रायेण न केनापि शाला–प्रमुखेन अकृतार्थः अहं परावर्तितः। क्वचित्तु प्रमुखाध्यापकस्य कार्यव्यग्रत्वात्, उपप्रमुखेन वा पर्यवेक्षकेण मम रोगजर्जरशरीरम् अवलोक्य स्वाधिकारम् उपयोज्य सद्य. पुस्तकानि अनवलोक्यैव क्रीतानि, मूल्यं च मे दापितम्। एवं डोंबिवली–नगरस्थिताम् कामपि नूतनशालां प्राप्य, प्रमुखशिक्षकम् उपगम्य सप्रणामं मम आगमनहेतुं न्यवेदयम्। तदा सौजन्यपूर्वकं सः अवदत् 'पुस्तकार्थं संरक्षितं द्रव्य सर्वं व्ययीकृतम् अस्माभि। अतः नववर्षारंभपर्यंतं न किमपि पुस्तकं क्रेतुं समर्थाः वयम्। अतः क्षम्यताम्।' इत्याकर्ण्य किंचित् कालं विमृश्य प्रत्यवदम्। 'तथास्तु। परं इयद्दूरम् आगतोऽस्मि। अतः पुस्तकानि तावद् द्रष्टव्यानि। दर्शनार्थं न किमपि देयं विद्यते'। 'तर्हि पश्यामि तावत्' मुख्याध्यापकः मम उपन्यासम् आहूय अमार्गत। मया 'सुभाषचरितम्' दत्तम्। इतस्ततः कतिपयान् श्लोकान् पठित्वा सः प्रसन्नमनसा स्वयम् स्वाभिप्रायं प्रकटितवान् 'काव्यं तु प्रसादपूर्णं प्रतीयते––कालिदासशैली दरीदृश्यते अत्र अनुकृता। क्रीणामि इदम्।' 'शोभनम्। क्रीयतां तथा। अनुगृहीतोऽस्मि।' इति उक्त्वा मूल्यम् आदाय हृष्टमनसा प्रतिनिवृत्तः अहम् अकल्पितरीत्या कृतार्थः।

(२) 'भवन्सजर्नल' नाम विख्यात–पाक्षिकपत्रे सुभाषचरितविषये प्रशंसापरे अभिप्राये प्रकटिते भारतस्य चतुर्दिग्भ्यः देयमूल्यद्वारा (V. P. Post) तत् प्रेषितुं आदेशा. मया लब्धाः। कश्चित् दिल्लीनगरवासी सिंधीमुख्याध्यापक उल्लासनगरम् आगतः, अहो! कविदर्शनलालसा! तदभिप्रायाकृष्ट ग्रीष्मर्तोः चंडतापमविगणय्य द्विवादनसमये कल्याणस्थं मम निवासम् प्राप्य, सोपानपरपराम् आरोहन् एव पृष्टवान् उच्चैः अस्खलितगीर्वाणभाषायाम् 'अत्र श्रीछत्रेमहोदयाः निवसति किम्' इति। आश्चर्यचकितोऽहं खलु अभवम् विलोक्य तस्य देववाक्–सभाषणपाटवं, आस्थां च कविदर्शनोत्तरमेव काव्यपुस्तकक्रयणस्य इच्छाम्। सः पं० श्री विष्णुदत्तभारद्वाजमहाशयः मम अविस्मरणीयरसिकेषु खलु एकतमः।

(३) संम्मानिता मे देववाक्सेवा

चेंबूर-नाम-उपनगरे पुस्तकविक्रयार्थं गतः कमपि विद्यालयं दृष्ट्वा प्रविष्टवान् अहम् । तत्र यद्यपि प्रमुखाध्यापकस्य अनुपस्थितित्वात् मम हेतुः न सफलीभूतः, तथापि कयाचित् शिक्षिकया मह्यं कथितं यत् तस्याः श्वशुरः गीर्वाणभाषायाम् अनुरागं धारयति, मम तद्दर्शनं च उभयोः संतोषाय आनंदाय च भवेदिति । तया श्वशुरनाम संकेतेन सह मह्यं विज्ञापितं, मम च तथैव लिखितं स्व-स्मरणपुस्तिकायाम् । द्वित्रिदिनेष्वेव मया निमंत्रण प्राप्तं तस्मात् संस्कृत-प्रेमिणः– श्री० कृष्णाजी–गंगाधर–गोकटे–महोदयात् । नियुक्तवेलायां तमहं दृष्टवान् । सत्वरमेव मया अभिज्ञातं यत् सेवानिवृत्तेः अनंतरम्, प्राप्त-बधिरत्वदुःखविस्मृतये मनोविनोदनाय च गीर्वाण-भाषाध्ययने सः बलवत् प्रवृत्तः । लेखनद्वारा मुहूर्तं सुखसंवादं विधाय मध्ये चायपानं स्वीकृत्य, प्रीतोऽभवं सविस्मयं विलोक्य तस्य स्वावलंबन-पूर्वककृताम् संस्कृतविषये प्रगतिम् । तेन न केवलं मम सुभाषचरितादि–पुस्तकानि क्रीतानि, परं उत्तरीयमपि मे समर्प्य, संम्मानिता खलु मम देववाणीसेवा–न छन्नेनाम व्यक्तिः—इति मन्ये । सः पुरुषार्थ-अमृतलता-इत्यादि-पत्रिकासु प्रकाशिते मदीये संस्कृतसाहित्ये परमम् आदरं धारयति— नाट्यवाङ्मये विशेषेण । फ्रेंचभाषापटुत्वेन बडोदासंस्थानशिक्षणविभागे क्रमेण शिक्षण-निरीक्षकपदं प्राप्य निवृत्तः अयं वृद्धतरुणः, रामायण-महाभारतसमग्रपठनेन संस्कृतलेखनभाषण-क्षमतां, बडोदा-संस्थान पुरस्कृताम् ततश्च श्रावणमास-दक्षिणामपि संपादितवान् । दुर्दम्येच्छया किं नु असाध्यम् ?

(३३) विद्वान् सर्वत्र पूज्यते

'विद्वान् सर्वत्र पूज्यते' इति नैकवारं मया अनुभूतम । नागपूरं मित्रवर्यं श्री. पु. कृ. मोहनीं द्रष्टुं गतोऽहं श्रुतवान् यद् आचार्य–विनोबामहाशयाः भंडारा-ग्रामम् आगताः पदयात्रायाम् । तेषां दर्शनार्थं तत्र गतोऽहं, प्रवासे एव विरचितं तदभिनंदनपरं संस्कृतकाव्यं, तेभ्यः समर्पितवान् समक्षम् । अभ्यागतस्य अभ्यागतः सरकृतकविः, कीर्तनप्रवचनकारश्च इति स्वीये स्वल्पे एव परिचये दत्ते, निवासभोजनवाहनादिव्यवस्था सादरं अक्रियत स्वयंसेवकैः । रोगाव-ग्रामं श्रीगजाननमहाराज-समाधिदर्शनार्थं च गतोऽहं स्वतंत्रप्रकोष्ठदानेन अनुगृहीतः (एकाकिने यात्रिकाय प्रकोष्ठः न दीयते) प्रवचनावसरश्च सद्यः मे समर्पितः, मम उपरिनिर्दिष्टकार्यविशेषप्रभावात् ।

(३४) दुर्लभम् अधिष्ठानम्

कस्मै अपि कार्याय अधिष्ठानम् अत्यावश्यम् । तच्च मुंबापुर्याम् इदानीं दुर्लभ्यं, मया सदैव लभ्यं सुहृद्वर्य—श्री. ल. म. चक्रदेवमहाशयानां निवासे, सहभोजनादि सुव्यवस्थया अपि । देववाणीं राष्ट्र-भाषापदं प्रापयितुं तेषां अविश्रांतः प्रयत्नः प्रथितः । तेषां सहधर्मचारिणी—अन्वर्थका खलु

'श्रीवत्स–बालसंस्कृतमंदिर' चालनात्। बालार्थं मया प्रादौ कृताः संस्कृतपद्यरचनाः यथा सा उपयोजयति, तथा नवनवपद्यरचनाः अपि मया कारयति। दुर्लभं खलु ईदृशं समानाभिरुचि-युग्मम्।

(३५) पू० पा० आचार्याणाम् आशिषः

(१) श्रीशंकराचार्याः (द्वारकापीठस्थाः) कल्याणम् आगताः मया दृष्टाः, दर्शितं च तेभ्यः श्रीशंकराचार्यस्तोत्रम् (प्रकाशित भारतवाणीपत्रे ७-६-१९६२ दिनांके) तथा रामकृष्णादिविभूति-स्तोत्राणि। गीर्वाण–भाषायामेव, मया तैः सह-संभाषितम् इति विलोक्य, प्रसन्नैः तैः प्रशस्तिपत्रं, रुप्यक-पंचक-दक्षिणां विभूतिं च मह्यं प्रदाय महान् अनुग्रहः कृत।

(२) श्री शंकराचार्याः—(डॉ० कुर्तकोटी) इत्येतैः 'रहस्यासहविभूतींचीं आठ स्तोत्रें'–संस्कृत-मराठी-समश्लोकी-नाम मम प्रथम-पुस्तक-हस्त-लिखितं निरीक्ष्य एवं काव्यबद्धः स्वामिप्रायः प्रेषितः।

"यत्स्तोत्रगुच्छं स्वकृतं प्रकीर्णं,
युष्माभिरस्ति प्रहितं विलिख्य।
तद् दृष्टिपातात् प्रतिभा प्रणेतुर्,
नैसर्गिकीं हि प्रकटी करोति।"

(३) श्रीशंकराचार्याः—कांची कामकोटी-पीठ–इत्येषां विद्वत्तां कार्यादिवृत्तेन सह केसरि–(दि० १४-७-१९६३) पत्रे पठित्वा, उपरिनिर्दिष्टं प्रकाशितं 'विभूतिस्तोत्र'पुस्तकं मया तान् प्रति उपायनार्थं प्रेषितम्। महद्भाग्यं यत् पंचदशरूप्यकाणि धनादेशद्वारा (M. O.) तेभ्यः विना विलंब प्रसादरूपेण प्राप्तानि।

(४) श्रीशंकराचार्याः (जेरेस्वामी) इत्येतैः कल्याणनगरम् आगतैः मया कृतः 'शतश्लोकी' (आद्यशंकराचार्याणाम्) मराठी समश्लोकानुवाद. सादरं परीक्षितः प्रशस्तिपत्रं च मे दत्तम्।

(५) अत्र त्रिविक्रममंदिरे आगताः केचन दाक्षिणात्याः यतिवर्याः, इति श्रुत्वा तेषां दर्शनार्थम् अगच्छम्। विज्ञापिताश्च मम संस्कृत-भाषानुरागितायां, कवित्वे च ते प्रवचनश्रम्यन् विगणय्य, श्रीहनूमन्मूर्तेः अग्रतः भूमौ एव नि-संकोचं उपविष्टाः श्रुतवंतः च सावधानं मद्रचि-तानि कानिचित् विभूतिस्तोत्राणि रहस्यं च गीर्वाणभाषायामेव। सुखसंवादांते तैः सकुतुकं अभिनंदितः अयं जनः, यत् ईदृशी व्यवसायभिन्ना गीर्वाणभाषायाम्, अभिरुचिः, संभाषणक्षमता, कवित्वशक्तिश्च क्वचिदेव दृश्यंते इति।

(६) श्रीअवधूतस्वामिभिः (लिमये–दादर–नावलकर बिल्डिंग शिवाजीपार्क मुंबई २८) नवपरिचितैः, श्रीअवधूतदत्तपीठानुरोधिकार्यम् इति मत्वा 'विभूति स्तोत्र' पुस्तकस्य प्रकाशन मुद्रा कृत्वा अनुगृहीतः अयं जनः। तदनंतरं मम संकल्पितं 'आठ संत' (चरित्रं बोधश्च) नाम पुस्तकं प्रकाशयितुं यथोचितं साहाय्यं मे समर्पि-तम्। तस्य प्रकाशनसमारोहे (१०-१०-१९६३ दिनांके) मम कीर्तन–प्रवचन–सामर्थ्यं संस्कृत-मराठी-भाषयोश्च काव्यरचनायां विशेषप्रतिभाम् अनुलक्ष्य 'शास्त्री' इति उपाधिः मह्यं समर्पितः तैः प्रीतैः।

(७) जगद्विख्यात–श्री चिन्मयानंदयतिवराणां शिष्येण–मम संबंधिजनेन–प्रार्थितोऽहं पत्रद्वारा "विद्यमाना चिन्मयप्रेरण-प्रतिज्ञा (Chinmaya Mission Pledge) आंग्लभाषानिबद्धा वर्तते। सा यदि श्रीमता गीर्वाणवाक्-पद्ये अनूद्येत, तर्हि भाषायाः दिव्यत्वात् भारतीयत्वाच्च पठनसौकर्येण सह तत्प्रसादगुणः वर्धेत, ततश्च पठत हृदयं तदर्थः झटिति प्रविश्य निश्चयेन प्रेरकः भवेत्, एवं च अनुवादकरणम् अनुमतं यतिवरैरिति"। एतत् पत्रं हस्तं मे आगतम्, अपराह्णे सार्धचतुर्वादनसमये। साय भ्रमणार्थं गतोऽहं भिवंडिसेतुं–मम स्फूर्तिस्थानम्। आपन्नप्राप्तिप्रतिज्ञाशयचिंतने एव मन्मनः रममाणं स्थितम्। आंग्लभाषाभिज्ञत्वात् प्रतिज्ञाशयस्य च श्रेष्ठत्वात् मम प्रतिभा झटिति जागरिता। भ्रमणान्निवृत्तः अहम् अनुवादरचनया सहैव, तस्य याथार्थ्यप्रत्ययाच्च समाहित, विशेषानदयुक्तश्च अभवम्, यदा मत्त. मूलेन सह श्रुतः अनुवाद., प्रशस्तः मम रसिकमित्रेण (श्री. आप्पारावभिडे महोदयेन) मार्गमध्ये नातिदूरं निवसता। इयं प्रतिज्ञा मत्कृतेन अनुवादेन सह प्रकाशिता यतिवरप्रचालिते 'तपोवन-प्रसाद' मासिके जुलै १९६६ अंके। तत्पूर्वं यतिवरै अभिनंदनपरे स्वपत्रे एवं स्वाभिप्रायः प्रकटित — "You have captured vividly. The entire spirit of the pledge and being meterical, it will be easy for the people to remember it."

जातिधर्मनिरपेक्षा इयं प्रतिज्ञा केनापि शश्वत्कल्याणेच्छुना मानवेन उपयोक्तव्या इति प्रतीयते। मराठीपद्येऽपि तस्याः अनुवादः मया विरचित. प्रवचनप्रसंगे च मुदा विशदीक्रियते तदाशय। वृत्तांतविस्तारभीतोऽपि अत्र तम् अनुवादम् उद्धर्तुं बलवत् प्रेर्यते अन्तः अयं जनः।

"सर्वे वयं गोत्रमिव स्म एकं,
प्रेमादरश्लक्ष्णगुणानुबद्धाः।
योद्धुं सदा चाखिलदुष्प्रवृत्तीः,
सेनैव सिद्धा नियताश्च धीराः ॥१॥

सेवापरित्यागमयायुषा च,
प्रतिग्रहेभ्योऽधिकमेव दद्मः।
मनस्वितासद्गुणधैर्यमार्गं,
त्रातुं प्रमादाय भजाम ईशम् ॥२॥

प्रभो ! कृपा ते च शुभाशिषोऽस्मद्-
द्वाराभितोऽस्मिन् जगति स्रवंतु।
स्वदेशसेवैव च देशसेवा,
सदेति भो ! विश्वसिमो दृढं च ॥३॥

जनेषु भक्तिः परमात्मभक्ति-,
रिति स्वकार्याणि च सुष्ठु विद्मः।
तेषां प्रपूर्त्यै कृपया प्रभो ! नो,
बलं च धैर्यं वितरोपयुक्तम् ॥४॥

(८) गोंडलऔषधयालयस्य राजवैद्याः साधुत्वे ख्याताः––मुम्बापुरीम् आगताः इति वृत्तपत्रे पठित्वा, प्रकृतिस्वास्थ्यरक्षणाय, तेभ्यः औषध सपादयितुम् अहं तेषां दर्शनाय अगच्छम्। प्रणम्य च मम संस्कृतग्रंथसूचिपत्रं तेभ्य प्रदाय अहं गीर्वाणभाषायां सभाषितुम् आरब्धवान्। तदा सुप्रीतैः तैः 'अयं तु पण्डित, अतः औषधमूल्य नियतस्य अर्धम् एव अस्माद् ग्रहीतव्यम्' इति मम प्रकरणे (Case paper) आदिष्टम्। तदा अवसराभावे सुखसंवादः यद्यपि नाभूत् तथापि मम देववाणीसेवा सफलीभूता इति अतुष्यम्। ततः नैकवारं तदापणात् औषधं मया क्रीतं लब्धम् अर्धमूल्येन, तेन मम स्वास्थ्यं च सुचिरं रक्षितम्।

(क्रमशः)

सुखस्यैकमूलं भवत्यात्मतत्त्वम्

(वृत्तं भुजङ्गप्रयातम्)

प्रा० श्री हरिश्चन्द्र रेणापुरकरः एम.ए. शासकीयमहाविद्यालय, गुलवर्गा, मैसूर

कृता मानवेनोन्नतिर्भौतिकी सा
यया पक्षिवद्देवमार्गेण याति ।
गंभीरं जलं गाहते मीनवच्च
धरायां तु वस्तु नरैर्नैव वेत्ति ॥१॥

तडित्तालवृन्तैश्च विद्युत्प्रदीपैः
स्वयं चालितैर्व्योमयानैस्तथान्यैः ।
उपायैः कृतस्तेन यत्नः सुखार्थं
परं मानवोऽयं सुखं हा ! न लेभे ।२।

सुखं प्राप्तुकामेन वै मानवेन
स्वयं निर्मितोत्तुङ्ग संस्कृत्यगारम् ।
क्षणे भस्मसात्संविधातुं प्रभूणि
कृतान्यस्त्रशस्त्राणि रौद्राणि तेन ।३।

मिथो वैरविद्वेषमात्सर्ययुक्तो
भयातङ्कसंदेहशङ्काकुलोऽयम् ।
शयानोऽपि वातानुकूलात्मगेहे
न निद्रां स लेभे न सौख्यं प्रपेदे ।४।

निदानं भवत्यात्मवैमुख्यमेव
प्रकृत्यात्मनोर्ह्यात्मतत्त्वं प्रधानम् ।
परं मानवोऽयं वपुष्यात्मबुद्धिः
करोत्येव घोराणि कृत्यानि नित्यम् ।५।

चिदानन्दरूपं तथाऽऽनन्दकन्दं
विहायात्मतत्त्वंप्रधानाज्जडात्किम् ।
सुखं प्राप्नुयान्मानवोऽयं कदाचिद्
जलं तृष्णिकायां कथं कोऽपि लेभे ।६।

सुखस्यैकमूलं चिरं शान्तिरूपं
चिदानन्दकोषं सदा सन्निविष्टम् ।
विहायात्मतत्त्वं भ्रमत्येष मूढः
रुरुर्नाभिगन्धं यथा मूढबुद्धिः ।७।

सदा सत्स्वरूपं स्वकीयात्मरूपं
विस्मृत्यात्मतत्त्वं यदा मानवोऽयम् ।
जडं भूतसंघातमात्रं शरीरं
करोत्यात्मस्थाने तदा भ्रंशतेऽसौ ।८।

पुरा भौतिकोत्कर्षशृङ्गाधिरूढ-
मभूद्भारतं नैव दुःखास्पदं तत् ।
निदानं तु तत्पूर्वजानां बभूव
समं भौतिकेनात्मबोधो गरीयान् ।९।

महाज्ञानविज्ञानयुक्तोऽपि नूनं
नरो वानरत्वं ध्रुवं संप्रयाति ।
पतत्येव तूर्णं महानाशगर्ते
यदा जायते चात्मतत्त्वाद्वियुक्तः ।१०।

पुनः शान्तिसौख्य-प्रवाहं प्रवर्त्य
समानेतुमत्रैव नाकं धरायां
विना धर्मविज्ञानयोः साहचर्याद्
गतिर्नान्यथा विद्यते सत्यमेव ।११।

———:o:———

महर्षिर्दयानन्दः

श्री पं० धर्मदेवो विद्यामार्तण्डः आनन्दकुटीरम्, ज्वालापुरम्

(१)

निखिलनिगमवेत्ता, पापतापापनेता,
रिपुनिचयविजेता, सर्वपाखण्डभेत्ता ।
अतिमहिततपस्वी, सत्यवादी मनस्वी,
जयति स समदर्शी, वन्दनीयो महर्षिः ।।

(२)

विमलचरितयुक्तः, पापमुक्तः, प्रशस्तः,
सकलसुकृतकर्ता, कर्मराशावसक्तः ।
दलितजनसुधारे, सर्वदा दत्तचित्तः,
जयति स कमनीयो वन्दनीयो महर्षिः ।।

(३)

प्रथितधवलकीर्तिः, शुद्धधर्मस्य मूर्तिः,
प्रसृतनिगमरीतिः, शत्रुवर्गेऽप्यभीतिः ।
अनुसृतशुभनीति, वेदशास्त्रेष्वधीती,
विबुधगणवरेण्यो वन्दनीयो महर्षिः ।।

(४)

अधिकतम उदारो धर्मसम्बोधकेषु,
श्रुतिविहितविचारो लोकसंरक्षकेषु ।
विदितनिगमसारो ब्रह्मचार्यग्रगण्यो
जयति स कमनीयो वन्दनीयो महर्षिः ।।

★

विशेषाङ्क की सूचना

सब पाठकों को सहर्ष सूचित किया जाता है कि 'गुरुकुल-पत्रिका' के दो अङ्क 'भाद्रपद तथा आश्विन २०२५, तदनुसार अगस्त-सितम्बर व सितम्बर-अक्टूबर ६८' विशेषाङ्क के रूप में प्रकाशित किए जाएंगे। इस विशेषाङ्क में साधारण अङ्क की अपेक्षा अधिक पृष्ठ होंगे।

—सम्पादक ।

: o :

सम्पादकीय टिप्पण्यः

विजानीह्यार्यान् ये च दस्यवो बर्हिष्मते
रन्धया शासदव्रतान् ऋ. १।५१।८

राष्ट्रे य आर्याः श्रेष्ठा इति, धार्मिका परोपकारिणो व्रतपरायणाः सज्जनाः सन्ति ते तथा ये च दस्यव उपक्षपयितार इति, दुष्टा विनाशका. सन्ति ते, एवं विभागद्वयविभक्ताः पुरुषा अस्मिन् भूतले सततं निवसन्त्येव । पर राष्ट्रे तेषा ज्ञान शासकेभ्य आवश्यकमित्यृचा भणितम् । के के च दस्यवो हिंसाव्यसनिन. सन्तीति गणनापुरस्सर तेषा शासनं राज्ञा विधातव्यम् । ये व्रतपरायणा सामाजिकनियमानां राज्यनियमानां वा पालकाः सन्ति ते पालनीयाः । ये च व्रतशून्या व्रतभङ्गकरा वा हिंस्रका दस्युपदेन सम्बोधिताः प्रजापीडनतत्परास्ते नून विनाश्यास्तेषां समूलोन्मूलनाय राज्ञा सदा तत्परेण भाव्यम् इति वह्वृचां व्याहृति. ।

अहो परमकारुणिकोऽमेरिकादेशः

भारतवर्षस्य दुर्भिक्षसमयेऽन्नादिप्रदानद्वाराऽमेरिकादेशेन परमं कारुण्यं प्रकटीकृतम् । अस्यां पृथिव्यां बुभुक्षापीडितः कोऽपि भारतीयो न म्रियेतेति परदुःखकातरेण दयया द्रवीभूतहृदयेन तेन महदुपकृतमस्माकम् । एकत्र तु तादृशी महती विलक्षणा दया पर परत्रातिस्वनविमानानि सैबरजेटादि टैङ्कानि तथान्यानि घोरतमप्रहरणशक्तिसम्पन्नानि चायुधजातानि पूर्वममेरिकादेशादुड्डीय फ्रांस-जर्मनी-इटली-तुर्कीआदिदेशेषु किञ्चित्कालपर्यन्त तानि विश्राम्यन्ति पुनरेभ्यो देशेभ्य उड्डीयं ईरानदेशे साउथअरेबियादेशे च पदं दधते । पुनर्यथावसरं प्रच्छन्नरूपेण पाकिस्तानदेशे समागत्य भारतीयानामुपरि प्रहरणायोद्यतानि तिष्ठन्ति । पृच्छ्यते, किमेतदपि कारुण्यम् ? कि न ज्ञायते ? यत् "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिशास्त्रोक्तिषु वद्धश्रद्धानां भारतीयाना स्वर्गगमनाकाङ्क्षाऽतिप्रवला भवति । तस्याः सम्पूर्त्यै केनाप्यदृश्यशक्तिनाऽसौ साधनरूपेण प्रयुक्तः । अमेरिकादेशस्य त्वत्र मनागपि दोषो न ।

—o—

साहित्य-समीक्षा

समालोचनार्थं पुस्तकद्वयं पत्रिकाकार्यालये प्रेषणीयम्

विश्वज्योति

(शिक्षा अंक)

सम्पादकवर्य.—आचार्यः श्री विश्वबन्धुशास्त्रिमहाभागः साधु आश्रम, होशियारपुर ।

विश्वविश्रुतस्य विश्वज्योतिपत्रस्यायं विशेषांकः समालोचनार्थं सम्प्राप्तः । भारतीयसाहित्याकूपारपारदृश्वभिर्विविधग्रन्थरत्ननिकरावचयपटुभिः सम्पादकवर्यैः श्री आचार्यविश्वबन्धुशास्त्रिमहाभागैः सम्पादितो विश्वज्योतिपत्रस्यायं विशेषांको मनोहारिरूपः सञ्जातः । अत्रास्त्यन्यदपि वैशिष्ट्यं यदन्यत्र नावलोक्यते । तदित्थम् यत् पत्रिकाया अर्द्धादप्यधिको भागः 'पुण्यपृष्ठ' नाम्ना संकलित.. यत्र दानदातारमुद्दिश्य तस्य भद्राय सार्थको मन्त्रः पृष्ठस्योपरि भागे सवेशितः । एवं शतादप्यधिकाय दानीनां समूहाय 'पुण्यपृष्ठं' समर्पित । एकत्रार्थलाभः परत्र भद्रकामना शैलीरियं द्व्यर्थकरी सिद्धा महाभागानां सम्पादकवर्याणां बुद्धिकौशलमभिव्यनक्ति । अनयैव रीत्या पत्रपत्रिकाः स्वस्थितिं दृढां कर्तुमर्हन्ति । समये समये लब्धजन्मनां महापुरुषाणां सूक्तयोऽप्यत्र विराजन्ते । साधुशिक्षाया महत्वं सर्वाधिकं विद्यते इत्यत्र नास्ति संशोति-

लेशोऽपि । देशे प्रसृता विघटनप्रवृत्तिर्विनश्येत् । भ्रष्टाचारादिदोषजातमपगच्छेत् । अत्युच्च चरित्रं संसिध्येदिति सर्वं साधुशिक्षयैव सम्भवति । अस्यां पत्रिकायामत्युच्चकोटिकाः सत्प्रेरणाप्रदा. सग्रहणीयाश्च लेखा संकलिताः सन्ति । अतः सर्वे प्राध्यापकवर्यै. शासनसूत्रधारिभिश्छात्रवर्गेश्चायं विशेषाकः पठनीयः । धन्यवादार्हः सम्पादकोत्तमः ।

सफल जीवन

लेखकः—श्री. बी. एन. चौबे, वरिष्ठ अधिवक्ता, भारतीय उच्चतम न्यायालय ।

प्रकाशकः—चतुर्वेदी पुरुषोत्तमदास स्मारकनिधि २२।१।१०६ चादरघाट, हैदराबाद२४ (आ.प्र)।

वैदिकदृष्टिकोणं मुख्यरूपेणावालम्ब्य मानवजीवनस्य प्रत्यङ्गं विचारकोटौ संस्थाप्य वेददृशा तत्समाधानं स्वमत्यनुसारं प्रदर्श्य पुस्तकमिद विरचितम् । विवादपदभाजो वेदान्तर्गतव्रात्यपदस्य तथा वैदिकवर्णाश्रमव्यवस्थायाश्च सुविशदीकरणाय महान् प्रयासो लेखकमहोदयस्यासीदिति दृष्टिपथमायाति । यदि मनुष्यो वैदिकादर्शान् मन्तव्याश्च यथावद् विज्ञाय वर्णाश्रमधर्मान् पालयेत्तदाऽसौ देवत्वमाप्तुमर्हतीति तत्र प्रतिपादितमस्ति । प्रस्तुतपुस्तके पाठकानामध्ययनाय प्रभूता सामग्री सकलिता विद्वद्वर्येण लेखकमहोदयेन । नैतदावश्यकं सर्वेषा मन्त्राणां सत्यं तत्त्वं, विवादास्पदं रहस्यं रहस्यजुषा लोकोत्तरपुरुषाणां पूर्णसन्तोषाय समुद्घाट्य प्रदर्शित स्यात् निबन्धकर्त्रा तथापि पुस्तकस्य पठनेनेद प्रतिभाति यल्लेखकमहोदयो बहुमुखी प्रतिभां सेवते । पुस्तकमिदं सर्वग्राह्यं पठनीयञ्च । साधुवादार्होऽयं लेखकमहोदय. । अन्ते एतदपि प्रार्थ्यते यदागामिनि संस्करणेऽशुद्धीनां परिमार्जनाय विशेषेण ध्यानं देयमिति ।

पञ्च महायज्ञ प्रदीप

लेखकः—श्री पं. मदनमोहन विद्यासागरः ।

प्रकाशकः—भारतीय प्राच्य विद्या प्रतिष्ठान, ४६४३ रेगरपुरा, गली नं० ४०, करोलबाग, नई दिल्ली ५ मूल्यम् ३)०० ।

अस्मिन् पुस्तके वैदिकग्रन्थान्वेषणतत्परेण विदुषा लेखकेन स्वामिदयानन्दविरचितस्य 'पञ्चमहायज्ञविधि' ग्रन्थस्य सरलभाषायां विस्तृता व्याख्या कृता विद्यते । लेखकमहोदयेन स्वपुस्तकस्य सम्बन्धे भूमिकायां लिखितं यत्—अन्य विषयों के स्वाध्याय के साथ साथ पञ्चमहायज्ञों पर मेरा स्वाध्याय और चिन्तन गत तीस वर्षों से चलता आ रहा है 'जिन मन्त्रों के अर्थ इस (पंचमहायज्ञविधि) में थे उनको भी अन्य स्थलों से मिलाकर पुनः देखा । एक ही मन्त्र का अर्थ कभी कभी दो स्थलों पर ऋषि के ग्रन्थों में उपलब्ध होता है । मैंने उनको परस्पर मिलाकर एकरूप दिया है । इससे न केवल मन्त्रार्थ ही स्पष्ट हुआ है । पर ऋषि दयानन्द का अभिप्राय भी अधिक विशद हो गया है ।······मैंने इस पुस्तक में ऋषि दयानन्द के शब्द, भाषा, भाव, शैली सबको यथासम्भव सुरक्षित रखने का प्रयत्न किया है । ग्रन्थ में आदि से अन्त तक एक सगति, दूसरा आर्य दर्शनों के सिद्धान्तों की पूर्णत रक्षा का यत्न किया है ।

अस्मन्मते अद्यावधि यत्रतत्रप्रकाशितानां पञ्चमहायज्ञविधिसंस्करणानां मध्ये संस्करणमिदं सर्वातिशायिसुन्दरं सम्पन्नं साधुसम्पादितं च । पञ्चमहायज्ञविधिसम्बन्धे स्वामिग्रन्थानामवलोकनस्याधुनाऽऽवश्यकता न विद्यते । वयं विद्वद्वर्यस्य लेखकमहोदयस्य भृशमभिनन्दनं कुर्मः । सर्वेष्वार्यसमाजेषु सर्वेषु चार्यपरिवारेषु पुस्तकमिदमवश्यं स्यादिति कामयामहे ।

—भगवद्दत्तो वेदालंकारः ।

(गताक से आगे)

उपनिषदों में मिश्रण. मांस-भक्षण और अश्लीलता

श्री शिवपूजनसिंह कुशवाहा 'पथिक' एम.ए., साहित्यालङ्कार विशारद, कानपुर

